# संस्कृत–पाठ्यक्रमः
## (हाईस्कूल)
(सम्प्रेषण–उपागम आधारितः)

संस्कृत भाषायाः सस्कृतेः मूलकत्वात्, संस्काराणां शिक्षणत्वात्, भारतीयभाषाणां तासाम् साहित्यस्य उपजी– व्यत्वात्, भारतीय ज्ञान् विज्ञान् आधारभूत्वात् च महत्त्वं विद्यते।

पाठ्यक्रमे संस्कृतस्य अध्ययनं नितरां ज्ञानाय, सम्प्रेषणाय, संस्काराय च भवति इति बहुशः प्रमाणितम्। संस्कृतस्य ज्ञानेन् अध्ययनेन उच्चारणेन वाक्शुद्धिः चित्तशुद्धिः तु भवत्येव इतोप्यधिकतया विचारशुद्धिरपि भवति। अधुना संस्कृतस्य साहित्यं, भाषा विज्ञानं तत्र प्रतिपादितः सार्वकालिक–सार्वभौमिक सिद्धान्तः संसारे समादृता संस्कृताध्ययनस्य तात्पर्यं लोकोत्तरेण वैश्विकभावसंसारेण सह आत्मीय सम्बन्धः।

एतेन संस्कृतस्य महत्त्वंसिद्धयति। मध्यप्रदेशे माध्यमिक शिक्षायां संस्कृतस्य अध्ययनाय छात्राणां योग्यतानुरूपं पाठ्यक्रमस्य स्वरूपं निर्धारितमस्ति।

एषः पाठ्यक्रमः सम्भाषणपद्धत्या एव निर्मितः। संस्कृतस्य संस्कृतमाध्यमेन शिक्षणं एतस्य पाठ्यक्रमस्य वैशिष्ट्यम्। पाठ्यक्रमे छात्रेषु श्रवण–भाषण–लेखन–पठनावगमन–कौशलानां विकासार्थं बिन्दवः अत्र प्रस्तुताः।

पाठयक्रमः छात्राणां योग्यता–विस्ताराय उपयुक्तः, शासनस्य संस्कृत शिक्षण उद्देश्यपूरकः, आधुनिक युगानुरूपः अस्तीति।

## संस्कृत शिक्षणस्य उद्देश्यानि–

1. **ग्रहणशीलता–**

श्रवण–पठन–माध्ययेन संस्कृतभाषा संसारे सहजतया प्रवेशाय छात्राणां योग्यताविस्तारः एव ग्रहणशीलता इति। कक्षायां पाठ्यवस्तोः वाचनेन–अनुवाचनेन आदर्श वाचनेन च श्रवणस्य पठनस्य च दक्षता आयाति। संस्कृतस्य भाषिक–संरचना वैज्ञानिकी अस्ति। तत्र उच्चारणस्य शुद्धता अपरिहार्या भवति। शुद्धोच्चारणेन, मनसि संस्कारः जायते। तेन शुद्धं पाठनमपि भवति।

2. **अभिव्यक्तिः–**

(अ) मौखिकाभिव्यक्तिः

(ब) लिखिताभिव्यक्तिः

शुद्धोच्चारणेन श्रवणेन पठनेन, ग्रहणशीलतायाः छात्रेषु विकासः भवति। अनन्तरं लब्धबोधस्य विषयस्य संस्कारस्य वा लेखने संभाषणे अभिव्यक्तिः भवति। अभिव्यक्तेः मूले ग्रहणशीलतायाः प्रभावः कार्यं करोति। श्रवण पठनयोः परिष्कारेण अभिव्यक्तिरपि उपयुक्ता भवति, पूर्णाभवति, विशुद्धा भवति, विषयानुरूपा च भवति।

अत्र द्वितीयक्रमे छात्राणां भाषणस्य परिष्कारः लेखनस्य परिष्कारः अपि जायते। श्रवणपठनयोः परिष्कारेण एव अभिव्यक्तेरपि परिष्कारः सुनिश्चितो भवति।

3. **अभिवृत्तौ परिवर्तनम्–**

तृतीयक्रमे अभिवृत्तेः स्थानम्। ग्रहणशीलतायाः अनन्तरं यदा अभिव्यक्तिः परिष्कृता भवति तदा विषयस्य अवबोधेन, नीति–धर्म–आदर्श–त्याग–परोपकारादि भावपरिचयेन, महापुरूषाणां कृत्तित्वेन व्यक्तित्वेन च छात्राणां अभिवृत्तौ परिवर्तनानि भवन्ति।

एतानि परिवर्तनानि अधोलिखितानि–

– जीवनमूल्यकेन्द्रितानि।

– सामाजिकसमरसताबोधकानि।

– राष्ट्रियभावनापूरितानि।

– सांस्कृतिकगौरवमोदितानि।

– महापुरूषाणां आदर्शप्रेरितानि।

4. **सृजनशीलता –**

चर्तुथक्रमे सृजनशीलतायाः विकासः अपेक्षितः भवति। वस्तुतः पाठ्यक्रमस्य साफल्यं सृजनशीलतायां एव सिद्धयति। यदि पाठयक्रमेण छात्रेषु सकारात्मक विचाराः, उद्दात्ताः भावाः, परिवार–समाज–राष्ट्रपरक सार्थक विचाराः न जागरिताः तदा पाठ्यक्रमस्य उद्देश्यं निरर्थकं भवति।

अत्र ग्रहणशीलतायाः सार्थकतायां अभिव्यक्तेः साफल्यं, अभिव्यक्तेः पूर्णतायां अभिवृत्तौ सार्थकं परिवर्तनं तथा च सार्थकेन अभिवृत्तौ परिवर्तनेन एव सृजनशीलतायाः छात्रेषु विकासः भवति, मौलिकतायाः स्फुरणं भवति। सृजनशीलतायाः बिन्दवः –

– मौलिक–रचनात्मक–विकासः।

– सम्भाषणमाध्यमेन संवादक्षमता–विकासः।

– संस्कृतवाक्यरचना–कौशलम्।

– संस्कृतेन भावार्थ–प्रबोधनम् ।

– निबन्धलेखनम्।

– मौलिककथा–पत्रादि निबन्धनम्।

एतेन ग्रहणशीलता–अभिव्यक्ति–अभिवृत्ति–सृजनशीलता सोपानचतुष्टयेन संस्कृतशिक्षणस्य उद्देश्यं सार्थकं पूर्णं च भवितुं अर्हति। एतेन संस्कृतसम्भाषणमाध्यमेन संस्कृतभाषा एवं साहित्य–शिक्षणेन छात्राः संस्कारिताः संस्कृतिपरायणाः, श्रेष्ठाः नागरिकाः भविष्यन्ति इति आशास्महे।

# संस्कृत–सामान्यम्
# कक्षा – नवमी
# ''दूर्वा''
## पाठ्यवस्तु

अङ्कविभाजनम् = 100

| | | | | | |
|---|---|---|---|---|---|
| गद्यम् | – | 10 | धातुरूपाणि | – | 4 |
| पद्यम् | – | 10 | सन्धिः | – | 4 |
| एकपदेन प्रश्नोत्तराणि | – | 4 | समासः | – | 3 |
| एकवाक्येन प्रश्नोत्तराणि | – | 6 | उपसर्ग | – | 2 |
| रिक्तस्थानानि | – | 4 | सूक्तिः | – | 2 |
| कारकप्रयोगः | – | 5 | अव्ययम् | – | 2 |
| युग्म–मेलनम् | – | 4 | शुद्धाशुद्धौ प्रयोगः | – | 4 |
| अपठितांशः | – | 5 | प्रत्ययः | – | 4 |
| कथाक्रम–संयोजनम् | – | 5 | पत्रम् | – | 4 |
| सुभाषितम् | – | 4 | निबन्धलेखनम् | – | 10 |
| शब्दरूपाणि | – | 4 | | | |

कुल योगः पूर्णांकः – 100

| | | |
|---|---|---|
| कुल कालांश | – | 160 |
| पुनरावृति | – | +20 |
| योग | – | 180 |

# संस्कृतम् – सामान्यम्
## कक्षा नवमी

### 'क' ( अपठित– अवबोधनम् )

(1) अपठितांशः 5

40–50 शब्दपरिमितः सरल गद्यांशः

सरल–गद्यांश–आधारितम् कार्यम्

– एकपदेन पूर्णवाक्येन च प्रश्नोत्तरकार्यम्

– अनुच्छेद–आधारित–भाषिककार्यम्

2. 80–100 शब्दपरिमितः गद्यांशः – सरलकथा घटनावर्णनं वा

– एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि।

– समुचितशीर्षकप्रदानम्।

– अनुच्छेद – आधारित – भाषिकाकार्यम्।

**भाषिककार्यम् इत्यनेन अभिप्रेतम् अस्ति**

(1) वाक्ये कर्तृ – क्रियापदचयनम्।

(2) कर्तृक्रिया – अन्वितिः ।

(3) विशेषणविशेष्य – अन्वितिः ।

(4) संज्ञास्थाने सर्वनामप्रयोगः अथवा सर्वनामस्थाने संज्ञाप्रयोगः ।

(5) अनुच्छेदे दत्तानां पर्याय – विलोमपदानां चयनम्।

### 'ख' (रचनात्मकं कार्यम्)

(3) अभिनन्दनपत्रम् व्यावहारिक–पत्रम्, वर्धापनपत्रम्, निमन्त्रणपत्रम्, प्रार्थनापत्रम्, 4

(4) निबन्ध–लेखनम् (75 शब्देषु) 10

### 'ग' (अनुप्रयुक्तव्याकरणम्)
### (प्रस्तावित पाठ्यपुस्तक– आधारितम्)

5. संस्कृतवर्णमाला

(अ) वर्ण – उच्चारणस्थानानि।

(ब) वर्तनी – वर्णसंयोजनम्, वर्णवियोजनम्।

6. वाक्येषु अनुच्छेदे वा सन्धिकार्यम् 4

(अ) स्वरसन्धिः – दीर्घः, गुणः, वृद्धिः, यण्, अयादिः, पूर्वरूपः।

(ब) व्य जन सन्धिः –

– श्चुत्वम्,

– ष्टुत्वम्,

– जश्त्वम्,

– चर्त्वम्,

– अनुस्वारः

– लत्वम्/परसवर्णः

स) विसर्गसन्धिः

विसर्गस्य उत्वं, लोपः

विसर्गस्थाने स्, श्, ष्।

7. वाक्येषु शब्दरूपाणां प्रयोगाः 4

| | | | |
|---|---|---|---|
| (अ) | शब्दाः–पुल्लिङ्गः अजन्ताः | – | अकारान्ताः (बालकवत्) इकारान्ताः (कविवत्) उकारान्ताः (साधुवत्) ऋकारान्ताः (पितृवत्/दातृवत्)। |
| | | हलन्ताः – | भवत्, आत्मन्, गच्छत्। |
| (ब) | स्त्रीलिङ्गा | अजन्ताः – | आकारान्ताः (रमावत्) इकारान्ताः (मतिवत्) ईकारान्ताः (नदीवत्) ऋकारान्ताः (मातृवत्)। |
| (स) | नपुंसकलिङ्गा अजन्ताः | – | अकारान्ताः (फलवत्) उकारान्ताः (मधुवत्) इकारान्ताः (वारिवत्)। |
| (द) | संख्यावाचक–शब्दाः | – | एक, द्वि, त्रि, चतुर्, पञ्चन्। |
| (च) | सर्वनामशब्दाः | – | यत्, तत्, किम्, इदम् (त्रिषु लिंङ्गेषु) अस्मद्, युष्मद्। |

8. वाक्येषु धातुरूपाणां प्रयोगाः

| | | |
|---|---|---|
| धातुरूपाणि | – | लट्,लोट,लृट्,लङ्, विधिलिङ्लकारेषु। |
| परस्मैपदिनः | – | भू (भव्), पठ्, हस्, नम्, गम् (गच्छ), |
| आत्मनेपदिनः | – | सेव्, लभ्, रूच्, मुद्, याच्। |
| उभयपदिनः | – | नी, हृ (हर) भज्, पच्। |

9. कारकाणां सामान्य प्रयोगाः 5

10. प्रत्ययाः (वाक्येषु प्रयोगाः) 4

कृदन्ताः – क्त, क्तवतु, क्त्वा, ल्यप्, तुमुन्, शतृ, शानच्, क्तिन्,।

स्त्री–प्रत्यायाः – टाप्, ङीप्, ङीष्, ङीन्।

तद्धित–प्रत्ययाः – मतुप्, इनि, तरप्, तमप्, मयट्।

11. समासानां सामान्यपरिचयः 3

द्वंद्वः, तत्पुरूषः, द्विगुः, अव्ययीभावः च।

12. उपसर्गाः 2

प्र, परा, अप, सम, निस्, अनु, अव, निर, दुस्, दुर्।

13. अव्ययानि — 2

यथा, तथा, तदा, यदा, कदा, यत्र, तत्र, सर्वत्र, कुत्र, अत्र, कुतः, यतः, ततः, ननु, खलु।

## 'घ' ( पठित अवबोधनम् )

14 सामग्री आधारितम् अवबोधनकार्यम्

(क) गद्यांश–नाट्यांशाधारित–संस्कृत–प्रश्नोत्तराणि — 10

(ख) पद्यांशाधारित–संस्कृत–प्रश्नोत्तराणि — 10

(ग) एकपदेन संस्कृत–प्रश्नोत्तराणि — 4

(घ) पूर्णवाक्येन संस्कृत–प्रश्नोत्तराणि — 6

15. सूक्ति–भावावबोधनम् — 2

16. शुद्धाशुद्धप्रयोगः — 4

17. रिक्तस्थानपूर्तिः — 4

18. कथाक्रम–संयोजनम् — 5

(क्रमरहित–अष्टवाक्यांनां क्रमपूर्वकं संयोजनम्)

19. युग्ममेलनम् — 4

20. पाठ्याधारित–सुभाषितम् — 4

निर्धारित पाठ्यपुस्तक – "दूर्वा"

मध्यप्रदेश राज्य शिक्षा केन्द्र द्वारा संकलित एवं निर्मित तथा मध्यप्रदेश पाठ्यपुस्तक निगम द्वारा प्रकाशित